Roll No. : ......................................

Total No. of Questions : **12** ]　　　　[ Total No. of Printed Pages : **4**

# SLA–303

## B.A. Part–III (Supplementary) Examination, 2022

## SANSKRIT

Paper - I

## (काव्य, स्मृति एवं निबन्ध)

*Time : 1½ Hours* ]　　　　[ *Maximum Marks : 100*

**खण्ड–अ**　　　　**(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब**　　　　**(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स**　　　　**(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वे प्रश्नाः अनिवार्याः सन्ति। केषाञ्चित् पञ्च प्रश्नानां उत्तराणि संस्कृत भाषायां लिखत :

   (i) 'कुमारसंभवे' कुमार नाम कस्य ?

   (ii) हिमालयः कस्य गृहमस्ति ?

   (iii) कुरुजन पदस्य स्वामी कः ? ब्रह्मचारीणं कस्मै कार्याय नियुक्तः ?

(iv) वनेचरस्य वाणी कीदृशी आसीत् ?

(v) अरिषड्वर्गाः काः ? नामोल्लेखं करणीयम्।

(vi) 'त्रयी' इत्यस्य तात्पर्यं किम् ?

(vii) 'ताभ्यः ऋतेऽन्वयः' इत्यत्र 'ताभ्यः' इत्यस्य कस्यार्थं प्रयुक्तः ?

(viii) स्त्रीधनं भर्ता कदा न दातुमर्हति।

(ix) महाकवि कालिदासस्य का प्रसिद्धा?

(x) के स्वर्गादपि गरीयसी ?

**खण्ड–ब**

**नोट** :– केषाञ्चित् पञ्चप्रश्नानां उत्तराणि दीयताम्–

2. अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः सप्रसङ्ग व्याख्या कार्या–

(i) यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोह दक्षे।
भास्वन्ति रत्नानि महौषधींश्च, पृथूपदिष्टां दुदुहु धरित्रीम्॥

(ii) प्रपन्न दिक्पांशुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टिः।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव॥

(iii) स्वरेण तस्यामृतस्त्रुतेव प्रजल्पितायामभिजात वाचि।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना॥

3. अधोलिखितेषु श्लोकेषु द्वयोः श्लोकयो सप्रसङ्ग व्याख्या कार्या–

(i) क्रियासु युक्तैर्नृपचार चक्षुषो
न पञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः॥

(ii) कथाप्रसङ्गेन जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः
सुदुःसहान्मन्त्रपदादिवोरगः॥

(iii) भवन्तमेतर्हि मनस्विगर्हिते

विवर्तमानं नरदेववर्त्मनि।

कथं न मन्युर्ज्वलयत्युदीरितः

शमीतरुं शुष्कमिवाग्निरुच्छिखः॥

4. अधोलिखितेषु द्वयोः गद्यांशयोः अनुवादः करणीयः।

(i) बुद्धिशून्यो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुध्यमाणमात्मानं न चेतयते। न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम्। अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते। न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय। अतिक्रान्तशासनाश्च प्रजा यत्किंचनवादिन्यो यथा—कथञ्चिद्वर्तिन्य सर्वा स्थितीः संकिरेयुः। निर्भर्यादश्च लोको लोकादिताऽमुतश्च स्वामिनमात्मानं च भ्रंशयते। आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा।

(ii) एतदाकर्ण्य स्थान एव गुरुभिरनशिष्टम्। तथा क्रियते इत्यन्तःपुरमविशत्। तां च वार्ता पार्थिवेन प्रमदासंनिधौ प्रसङ्गेनोहीरितामुपनिशम्य समीपोपविष्टश्चित्तानुवृत्तिकुशलः प्रसादवित्तो गीतनृत्यवाद्यादिष्वबाह्यो बाह्यनारीपरायणः पटुरयन्त्रितमुखो बहुभङ्गिविशारदः परमर्मान्वेषणपरः परिहासयिता परिवादरुचिः पैशून्यपण्डितः सचिवमण्डलादप्युत्कोचहारी, सकलदुर्नयोपाध्यायः काम तन्त्रकर्णधारः कुमारसेवको विहारभद्रोनामस्मितपूर्व व्यज्ञापयत्।

(iii) भद्र, मैव वादीः। अभिजनस्य शुद्धिदर्शनम्, असाधारणं बुद्धि नैपुण्यम्, अपरिमाणमोदार्यम्, अत्याश्चर्यमस्त्रकौशलम्, अनल्पं शिल्प ज्ञानम्, अनुग्रहार्द्रं, तेजश्चाप्याविषह्यमभ्यमित्रीणमित्यस्मिन्नेव संनिपातिनो गुणाः, येऽन्यत्रैकैकशोऽपि दुर्लभाः। द्विषतामेष चिरबिल्वद्रुमः प्रह्लाणां तु चन्दनतरु स्तमुद्धृत्य नीतिज्ञं-मन्यमशकमिमं च राजपुत्रमनेन पित्र्ये पदे प्रतिष्ठितमेव विद्धि। नात्र संशयः कार्यः इति।

5. अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्ग व्याख्या कार्या—

(i) भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।

तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥

(ii) असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।

भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम्॥

(iii) अप्रजस्त्रीधनं भर्त्तृब्राह्मादिषु चतुर्ष्वपि।

दुहितृणां प्रसूता चेच्छेपेषु पितृगामि तत्॥

6. महाकाव्यस्य लक्षणं किम् ? कुमारसंभवस्य महाकाव्यत्वं सुसाधनीयम्।

7. दशकुमारचरितस्य अष्टमोच्छ्वासस्य वैशिष्ट्यं प्रतिपादयत।

8. एकस्मिन् विषये संस्कृतभाषायां निबन्धः लेखनीयः–

   (i) संस्कृत भाषायाः महत्त्वम्।

   (ii) पर्यावरण–प्रदूषणम्।

**खण्ड–स**

9. किरातार्जुनीयस्य प्रथमसर्गाधारेण 'भारवेरर्थगौरवम्' इत्यस्य विवेचनं करणीयम्।

10. कुमारसम्भवस्य प्रथमसर्गाधारेण कालिदासस्य उपमा वैशिष्ट्यं वर्णयत।

11. दण्डिनः काव्यवैशिष्ट्यं वर्णयत।

12. एकस्मिन् विषये संस्कृतभाषायां निबन्धः लेखनीयः–

   (अ) सत्सङ्गति

   (ब) मम प्रिय पुस्तकम्

   (स) भारतीया संस्कृतिः

   (द) संस्कृतस्य प्रचारोपायाः